# Chandra Kavacham

अस्य श्री चंद्र कवचस्य । गौतम ऋषिः । अनुष्टुप् छंदः । श्री चंद्रो देवता ।
चंद्र प्रीत्यर्थे जपे विनियोगः ॥

ध्यानं
समं चतुर्भुजं वंदे केयूर मकुटोज्वलम् ।
वासुदेवस्य नयनं शंकरस्य च भूषणम् ॥

एवं ध्यात्वा जपेन्नित्यं शशिनः कवचं शुभम् ॥

अथ चंद्र कवचम

शशी पातु शिरोदेशं भालं पातु कलानिधिः ।
चक्षुषी चन्द्रमाः पातु श्रुती पातु निशापतिः ॥ १ ॥

प्राणं क्षपकरः पातु मुखं कुमुदबान्धवः ।
पातु कण्ठं च मे सोमः स्कन्धे जैवातृकस्तथा ॥ २ ॥

करौ सुधाकरः पातु वक्षः पातु निशाकरः ।
हृदयं पातु मे चन्द्रो नाभिं शङ्करभूषणः ॥ ३ ॥

मध्यं पातु सुरश्रेष्ठः कटिं पातु सुधाकरः ।
ऊरू तारापतिः पातु मृगाङ्को जानुनी सदा ॥ ४ ॥

अब्धिजः पातु मे जङ्घे पातु पादौ विधुः सदा ।
सर्वाण्यन्यानि चाङ्गानि पातु चन्द्रोखिलं वपुः ॥ ५ ॥

फलश्रुतिः
एतद्धि कवचं दिव्यं भुक्ति मुक्ति प्रदायकम् ।
यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत् ॥ ६ ॥

॥ इति श्रीचन्द्र कवचं सम्पूर्णम् ॥